वैयाकरणसिद्धान्तकौमुदी

कारकप्रकरणम् (३३)

०७.१०.२०१३

पञ्चमीविभक्तिः - अभ्यासः

- वाक्यम् आवरणे दत्तस्य पदस्य सूक्तविभक्त्यन्तेन रूपेण पूरयित्वा (यथासम्भवं सर्वाः विभक्तयः उपयोक्तव्याः) सलक्षणं प्रमाणीकुरुत ।
- (तत्) विना तृणमपि न चलति । (Even grass does not move without him)
- तम्/तेन/तस्माद् – पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् (२.३.३२)
- आ (बाल) हरिभक्तिः दृश्यतेऽत्र । (Here, devotion to Hari is seen including children)
- आ बालेभ्यः – आङ्मर्यादावचने (१.४.८९), पञ्चम्यपाङ्परिभिः (२.३.१०)

पञ्चमीविभक्तिः - अभ्यासः

- महाराज्ञी (सिंहासन) नृत्यं वीक्षते । (The queen watches the dance from the throne)
- सिंहासनात् – ल्यब्लोपे कर्मण्यधिकरणे च (वा)
- अहं श्वः (ग्राम) प्रत्यागच्छामि । (I will return from the village tomorrow)
- ग्रामात् – ध्रुवमपायेऽपादानम् (१.४.२४), अपादाने पञ्चमी (२.३.२८)
- सः पापी (कुकर्मन्) न जुगुप्सते । (That sinner does not shy away from evil deeds)
- कुकर्मणः / कुकर्मभ्यः – जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् (वा)

पञ्चमीविभक्तिः - अभ्यासः

- कृष्णः (सान्दीपनि) अध्यैत । (Krishna studied under Sandipani)
- सान्दीपनेः – आख्यातोपयोगे (१.४.२९), अपादाने पञ्चमी (२.३.२८)
- अधमर्णः (उत्तमर्ण) अन्तर्दधाति ।(The borrower hides himself from the lender)
- उत्तमर्णात् – अन्तर्द्धौ येनादर्शनमिच्छति (१.४.२८), अपादाने पञ्चमी (२.३.२८)
- (दया) परि धर्मो न राजते । (Dharma does not shine without compassion)
- दयायाः परि – अपपरी वर्जने (१.४.८८), पञ्चम्यपाङ्परिभिः (२.३.१०)

पञ्चमीविभक्तिः - अभ्यासः

- दाने नास्ति (कर्ण) प्रति । (None is equal to Karna in charity)
- कर्णात् प्रति – प्रतिः प्रतिनिधिप्रतिदानयोः (१.४.९२), प्रतिनिधिप्रतिदाने च यस्मात् (२.३.११)
- अकिञ्चनः स बालः (कृच्छ्र) अधीतवान् । (That poor boy studied with great difficulty)
- कृच्छ्राद् अधीतवान् – करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य (२.३.३३)
- (युगादि) (पक्ष) परीक्षा भविष्यति । (The exams will be in a fortnight after Ugadi)
- युगादेः पक्षे – यतश्चाध्वकालनिमानं ततः पञ्चमी (वा) । कालात्सप्तमी च वाच्या (वा)

पञ्चमीविभक्तिः - अभ्यासः

- (भागमण्डल) कावेरी प्रभवति । (Kaveri flows from Bhagamandala)
- भागमण्डलात् – भुवः प्रभवः (१.४.३१), अपादाने पञ्चमी (२.३.२८)
- रामः (रावण) पराजयते । (Rama defeats Ravana)
- रावणम् – कर्तुरीप्सिततमं कर्म (१.४.४७), कर्मणि द्वितीया (२.३.२)
- हनूमान् (महेन्द्रपर्वत) समुद्रं तर्तुमुद्युक्तः । (Hanuman set forth to cross the ocean climbing up the Mahendra mountain)
- महेन्द्रपर्वतात् – ल्यब्लोपे कर्मण्यधिकरणे च (वा)

पञ्चमीविभक्तिः - अभ्यासः

- (समुद्रतीर) लङ्का (शतयोजन) । (Lanka is at a distance of hundred yojanas from this side of the ocean)
- समुद्रतीरात् लङ्का शतयोजनम्/शतयोजने - यतश्चाध्वकालनिमानं ततः पञ्चमी (वा) । तद्युक्तादध्वनः प्रथमासप्तम्यौ (वा) ।
- विदुरः (पापाचरण) धृतराष्ट्रं वारयितुं प्रायतत । (Vidura tried to prevent Dhritarashtra from sinful act)
- पापाचरणात् – वारणार्थानामीप्सितः (१.४.२७), अपादाने पञ्चमी (२.३.२८)
- (श्रीलङ्का) उत्तरा भारतदेशः । (India is to the north of Srilanka)
- श्रीलङ्कायाः – अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते (२.३.२९)

पञ्चमीविभक्तिः - अभ्यासः

- मम शाला इतः (समीप) । (My school is close to here)
- समीपम्/समीपात्/समीपेन – दूरान्तिकार्थेभ्यो द्वितीया च (२.३.३५)
- सः वृद्धः कृषिकः (लक्षरूप्यक) मृतः । (That old farmer died because of his loan of a lakh rupees)
- लक्षरूप्यकेभ्यः – अकर्तर्यृणे पञ्चमी (२.३.२४)
- युध्यमानः अभिमन्युः व्रणितः (रथ) अपतत् । (The fighting Abhimanyu, wounded, fell from the chariot).
- रथात् - ध्रुवमपायेऽपादानम् (१.४.२४), अपादाने पञ्चमी (२.३.२८)
- (मधु) मधुरं सुभाषितम् । (Subhashita is sweeter than nectar)
- मधुनः - ध्रुवमपायेऽपादानम् (१.४.२४), अपादाने पञ्चमी (२.३.२८) (बुद्धिकृतमपादानत्वम्)